# Shri Ganganarayanadevashtakam

# શ્રીગઙ્ગાનારાયણદેવાષ્ટકમ્

## Document Information

Text title : gangAnArAyaNadevAShTakam

File name : gangAnArAyaNadevAShTakam.itx

Category : vishhnu, krishna, aShTaka, vishvanAthachakravartin, stavAmRRitalaharI

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Shri Ganganarayanadevashtakam

# શ્રીગઙ્ગાનારાયણદેવાષ્ટકમ્

કુલસ્થિતાન્ કર્મિણ ઉદ્દિધીર્ષુ-
ર્ગઙ્ગૈવ યસ્મિન્ કૃપયાવિશેષ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૧॥

નરોત્તમો ભક્ત્યવતાર એવ
યસ્મિન્ સ્વભક્તિં નિદધૌ મુદૈવ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૨॥

વૃન્દાવને યસ્ય યશઃ પ્રસિદ્ધં
અદ્યાપિ ગીયતે સતાં સદઃસુ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૩॥

શ્રીગોવિન્દદેવદ્વિભુજત્વશંસિ
શ્રુતિં વદન્ સદ્વિપદં નિરાસ્થત્ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૪॥

સૌશીલ્યયુક્તો ગુણરત્નરાશિઃ
પાણ્ડિત્યસારઃ પ્રતિભાવિવસ્વાન્ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૫॥

જનાન્ કૃપાદૃષ્ટિભિરેવ સદ્યઃ
પ્રપદ્યમાનાન્ સ્વપદેઽકરોદ્યઃ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૬॥

લોકે પ્રભુત્વં સ્થિરભક્તિયોગં
    યસ્મૈ સ્વયં ગૌરહરિર્વ્યતાનીત્ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
    નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૭॥

વૃન્દાવનીયાતિરહસ્યભક્તેર્જ્ઞાનં
    વિના યઃ ન કુતોઽપિ સિદ્ધ્યેત્ ।
શ્રીચક્રવર્તી દયતાં સ ગઙ્ગા
    નારાયણઃ પ્રેમરસામ્બુધિર્મામ્ ॥ ૮॥

વિશ્રમ્ભવાન્ યશ્ચરણેષુ
    ગઙ્ગાનારાયણપ્રેમામ્બુરાશેઃ ।
એતત્પઠેદષ્ટકમેકચિત્તઃ
    સ તત્પરીવારપદં પ્રયાતિ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
        શ્રીશ્રીગઙ્ગાનારાયણદેવાષ્ટકં સમ્પૂર્ણમ્ ॥

*Shri Ganganarayanadevashtakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*